श्वेताख्यस्तु जटाकारी श्यामो व्योमविभागग: ।
निवर्त्ततेऽपसव्येन त्रिभागीकुरुते प्रजा: ॥”
इति समयामृतम् ॥

(मुनिविशेष: । यथा, महाभारते । १।५३।७।
“उद्दालक: प्रमतक: श्वेतकेतुश्च पिङ्गल: ॥”
स तु उद्दालकमुने: पुत्त्र: । पुरा किल नार्य्य: प्रायश: पूर्व्वपतिं परित्यज्य पत्यन्तरं जगृहु: । अनेन तु तद्दोषमपाकृत्य समाजमर्य्यादा स्थापिता । यथा, महाभारते । १।१२२।९—२०
“बभूवोद्दालको नाम महर्षिरिति न: श्रुतम् ।
श्वेतकेतुरिति ख्यात: पुत्त्रस्तस्याभवन्मुनि: ॥
मर्य्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना ।
कोपात् कमलपत्राक्षि ! यदर्थं तं निबोध मे ॥
श्वेतकेतो: किल पुरा समक्षं मातरं पितु: ।
जग्राह ब्राह्मण: पाणौ गच्छाव इति चाब्रवीत् ॥
ऋषिपुत्त्रस्तत: कोपं चकारामर्षचोदित: ।
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव ॥
क्रुद्धं तन्तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह ।
मा तात कोपं कार्षीस्त्वमेष धर्म्म: सनातन: ॥
अनावृता हि सर्व्वेषां वर्णानामङ्गना भुवि ।
यथा गाव: स्थितास्तात स्वे स्वे वर्णे तथा प्रजा: ॥
ऋषिपुत्त्रोऽथ तं धर्म्मं श्वेतकेतुर्न चक्षमे ।
चकार चैव मर्य्यादामिमां स्त्रीपुंसयोर्भुवि ॥
मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु ।
तदाप्रभृति मर्य्यादा स्थितेयमिति न: श्रुतम् ॥
व्युच्चरन्त्या: पतिं नार्य्या अद्यप्रभृति पातकम् ।
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ॥
भार्य्यां तथा व्युच्चरत: कौमारब्रह्मचारिणीम् ।
पतिव्रतामेतदेव भविता पातकं भुवि ॥
पत्या नियुक्ता या चैव पत्नी पुत्त्रार्थमेव च ।
न करिष्यति तस्याश्च भविष्यति तदेव हि ॥
इति तेन पुरा भीरु मर्य्यादा स्थापिता बलात् ।
उद्दालकस्य पुत्त्रेण धर्म्या वै श्वेतकेतुना ॥”)

श्वेतकेश:, पुं, (श्वेता: केशा यस्मात् ।) रक्तशिग्रु: । इति जटाधर: ॥ (श्वेत: केश: ।) शुक्लकचश्च ॥

श्वेतकोल:, पुं, (श्वेत: कोल: क्रोड़देशो यस्य ।) शफरमत्स्य: । इति त्रिकाण्डशेष: ॥

श्वेतखदिर:, पुं, (श्वेत: खदिर: ।) शुक्लखदिर: । तत्पर्य्याय: । कदर: २ श्वेतसार: ३ कार्म्मुक: ४ । कुब्जकण्टक: ५ सोमसार: ६ सोमवृक्ष: ७ सोमवल्क: ८ पथिद्रुम: ९ । अस्य गुणा: । तिक्तत्वम् । कषायत्वम् । कटुत्वम् । उष्णत्वम् । कण्डूतिभूतकुष्ठकफवातव्रणनाशित्वञ्च । इति राजनिर्घण्ट: ॥ पुस्तकान्तरे कार्म्मुकस्थाने कामुक: कुब्जकण्टकस्थाने कुष्ठकण्टक: इति च पाठ: ॥ * ॥ अन्यच्च ।
“खदिर: श्वेतसारोऽन्य: कदर: सोमवल्कल: ।
कदरो विशदोऽवर्ण्यो मुखरोगकफास्रजित् ॥”
इति भावप्रकाश: ॥

श्वेतगज:, पुं, (श्वेत: शुक्लो गज: ।) इन्द्रहस्ती । इति हेमचन्द्र: ॥ शुक्लवर्णहस्ती च ॥

श्वेतगरुत्, पुं, (श्वेत: गरुत् पक्षो यस्य ।) हंस: । इत्यमर: । २ । ५ । २३ ॥

श्वेतगुञ्जा, स्त्री, (श्वेता गुञ्जा ।) शुक्लगुञ्जा । सादा कुँच इति भाषा । तत्पर्य्याय: । श्वेतकाम्बोजी २ भिल्लभूषा ३ काकादनी ४ काकपीलु: ५ चक्राङ्ग्या ६ चूड़ाला ७ । अस्या गुणा: । तीक्ष्णत्वम् । उष्णत्वम् । तस्या बीजं वान्तिकरम् । तस्या: शिफा शूलविषनाशिनी । तस्या: पत्रं वश्ये प्रशस्तम् । इति राजनिर्घण्ट: ॥ अपि च ।
“श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकनन्ती च रक्तिका ॥
काकादनी काकपीलु: सा स्मृताङ्गारवल्लरी ।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम् ॥
मुखशोषभ्रमश्वासतृष्णामदविनाशनम ।
नेत्रामयघ्नं हृष्यं बल्यं कण्डूं व्रणं हरेत् ।
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥”
इति भावप्रकाश: ॥
अन्यच्च ।
“गुञ्जा शिखण्डिका ताम्रा रक्तिका काकशान्तिका ।
श्वेताख्या चक्रिका चूडा दुर्म्माषा काकपीलुका ॥
गुञ्जा केश्या बलकरा रुच्या पित्तकफापहा ।
नेत्रामयहरा वृष्या हन्ति कण्डुग्रहव्रणान् ।
कृमीन्द्रलुप्तकुष्ठानि तद्वच्छ्वेतापि शस्यते ॥”
इति मदनपालनिर्घण्ट: ॥

श्वेतचन्दनं, क्ली, (श्वेतं चन्दनम् ।) शुक्लचन्दनम् । इति राजनिर्घण्ट: ॥ अस्य पर्य्यायगुणौ चन्दनशब्दे द्रष्टव्यौ ॥

श्वेतचिल्ली, स्त्री, (श्वेता चिल्ली ।) शाकभेद: । तत्पर्य्याय: । वास्तुकी २ सुपथ्या ३ श्वेतचिल्लिका ४ सितचिल्ली ५ उपचिल्ली ६ ज्वरघ्नी ७ क्षुद्रवास्तुकी ८ । अस्या गुणा: ।
“श्वेतचिल्ली सुमधुरा क्षारा च शिशिरा च सा ।
त्रिदोषशमनी पथ्या ज्वरदोषविनाशिनी ॥”
इति राजनिर्घण्ट: ॥

श्वेतच्छद:, पुं, (श्वेत: च्छदो यस्य ।) हंस: । इति हलायुध: ॥ गन्धपत्र: । इति शब्दचन्द्रिका ॥ बाबुइ तुलसी इति भाषा ॥

श्वेतजीरक:, पुं, (श्वेतो जीरक: ।) गौरजीरक: । इति राजनिर्घण्ट: ॥

श्वेतटङ्कं, क्ली, (श्वेतं टङ्कम् ।) श्वेतटङ्कणम् । इति राजनिर्घण्ट: ॥

श्वेतटङ्कणं, क्ली, (श्वेतं टङ्कणम् ।) क्षारविशेष: । सादा सोहागा इति भाषा । तत्पर्य्याय: । श्वेतटङ्कम् २ लोहि ३ सिन्धुकरम् ४ सिन्धु ५ मालतीतीरसम्भवम् ६ शिवम् ७ द्रावकरम् ८ शीतक्षारम् ९ टङ्कणम् १० । अस्य गुणा: । स्निग्धत्वम् । कटुत्वम् । उष्णत्वम् । कफवातामक्षयश्वासविषकासमलनाशित्वञ्च । इति राजनिर्घण्ट: ॥

श्वेतदूर्व्वा, स्त्री, (श्वेता दूर्व्वा ।) शुक्लदूर्व्वा । तत्पर्य्याय: । गोलमी २ सिताह्वा ३ चण्डा ४ भद्रा ५ भार्गवी ६ दुर्म्मरा ७ गौरी ८ विघ्नेशानकान्ता ९ अनन्ता १० श्वेता ११ दिव्या १२ श्वेतकाण्डा १३ प्रचण्डा १४ सहस्रवीर्य्या १५ सहस्रकाण्डा १६ सहस्रपर्व्वा १७ सुरवल्लभा १८ शुभा १९ सुपर्व्वा २० सितच्छदा २१ स्वच्छा २२ कच्छान्तरुहा २३ । अस्या गुणा: । अतिशिशिरत्वम् । मधुरत्वम् । वान्तिपित्तामातिसारकासदाहतृषानाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्ट: ॥

श्वेतद्विप:, पुं, (श्वेत: शुक्लो द्विप: ।) इन्द्रहस्ती । इति त्रिकाण्डशेष: ॥ शुक्लगजश्च ॥

श्वेतद्वीप:, पुं, क्ली, (श्वेतो द्वीप: ।) चन्द्रद्वीप: । स च वैकुण्ठाख्यविष्णुधाम । यथा,—
“श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरम् ।
तत्र ह्यायमभूत् प्रश्नस्त्वं मां यमनुपृच्छसि ॥”
इति श्रीभागवते १० स्कन्धे ८७ अध्याय: ॥
अपि च ।
“एकदा ब्रह्मणो लोकादायान्तं नारदं मुनिम् ।
पर्य्यटन् रावणो लोकान् दृष्ट्वा नत्वाब्रवीद्वच: ॥
भगवन् ! ब्रूहि मे युद्धं कुत्र सन्ति महाबला: ।
योद्धुमिच्छामि बलिभिस्त्वं जानासि जगत्त्रयम् ॥
मुनिर्ध्यात्वा तु सुचिरं श्वेतद्वीपनिवासिन: ।
महाबला महाकायास्तत्र याहि महामते ॥
विष्णुपूजारता ये वै विष्णुना निहताश्च ये ।
त एव तत्र संजाता अजेयाश्च सुरासुरै: ॥
श्रुत्वा तद्रावणो वेगान्मन्त्रिभि: पुष्पकेण तान् ।
योद्धुकाम: समागत्य श्वेतद्वीपसमीपत: ॥
तत्प्रभाहततेजस्कं पुष्पकं नाचलत्तत: ।
त्यक्त्वा विमानं प्रययौ मन्त्रिणश्च दशानन: ॥
प्रविशन्नेव तद्द्वीपं धृतो हस्तेन योषिता ।
पृष्टश्च त्वं कुत: कोऽसि प्रेषित: केन वा वद ॥
इत्युक्त्वा लीलया स्त्रीभिर्हसन्तीभि: पुन: पुन: ॥
कृच्छ्रादस्ताद्विनिर्म्मुक्तस्तासां स्त्रीणां दशानन: ॥
आश्चर्य्यमतुलं लब्ध्वा चिन्तयामास दुर्म्मति: ।
विष्णुना निहतो यामि वैकुण्ठमिति निश्चित: ॥
मयि विष्णुर्यथा कुप्येत्तथा कार्य्यं करोम्यहम् ॥
इति निश्चित्य वैदेहीं जहार विपिनेऽसुर: ।
ज्ञात्वैव परमात्मानं ? जहारावनीसुताम् ॥”
इति श्रीब्रह्माण्डपुराणे श्रीमदध्यात्मरामायणे उत्तरकाण्डे ४ अध्याय: ॥ अन्यच्च ।
“श्वेतां गङ्गां नर: स्नात्वा य: पश्येत् श्वेतमाधवम् ।
मत्स्याख्यं माधवञ्चैव श्वेतद्वीपं स गच्छति ॥”
इति तीर्थचिन्तामणि: ॥

श्वेतधातु:, पुं, (श्वेतो धातु: ।) खटिका । इति राजनिर्घण्ट: ॥ शुक्लवर्णधातुद्रव्यञ्च ॥